**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# ज्योतिषशास्त्रे मनोविज्ञानम्

डा. विश्वरञ्जनपति
ज्योतिषविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिव-परिसर, पुरी

ज्योतिषशास्त्रे जातकभागे फलनिरूपणेन साकं मानवीयव्यवहारसम्बद्धाः मनोवैज्ञानिकांशाः अपि केचित सूचितास्सन्ति-तद्यथा –

(१) व्यक्तित्वम् :- सात्त्विक-राजसिक-तामसिकभेदेन व्यक्तित्वम्

बृहत्पाराशरहोराशास्त्रे त्रिगुणफलाध्याये ७७ अध्याये व्यक्तित्वं एवं वर्णितमस्ति ।

पराशर उवाच

गुणानुसारमथ ते फलं वच्म्यधुना मुने ।
प्राधान्ये सत्त्वखेटस्य जातो विज्ञश्च सात्त्विकः ।।
राजसग्रहप्राधान्ये जातः स्याद् राजसो बुधः ।
तमोग्रहस्य प्राधान्ये मन्दधीस्तामसो नरः ।।
गुणत्रयस्य तुल्यत्वे जातो मित्रगुणी स्मृतः ।
चतुर्धा मानवाश्चेत्थ-मुदिता मुनिभिः पुरा ।।
श्रेष्ठमध्याधमाश्चैवमुदासीनाः क्रमेण ते ।
प्राचीनमुनिभिः प्रोक्तान्स्तद्गुणान् कथयामिते ।।

उत्तम-मध्यम-अधम-उदासीनपुरुषाणां लक्षणानि –

शान्तोदान्त; शुचिः सरलः सत्यवागपि ।
अलुब्धस्वापसः सत्त्वप्रधान्ये जायते नरः ।।
तेजस्वी धृतिमान् दक्षः समरेत्वपराङ्मुखः ।
सतां शरण्यस्तु जनः प्राधान्ये रजसो भवेत् ।।

लुब्धो मिथ्याभिभाषीचालसो मूर्खोऽधमस्तथा ।
सेवासु निपुणो जातः प्राधान्ये तमसो भवेत् ।।
कृषीवलो वणिक्कर्मकुशलः पशुपालकः ।
सत्यानृतप्रवक्ता च गुणसाम्ये जनो भवेत् ।।
एवं चतुर्विधानुक्तानुत्तमाधममध्यमान् ।
उदासीनांश्च विबुधस्तत्तकर्मणि योजयेत् ।।
गुणेषु यस्य प्रावल्र्यमेधिक्यं तस्य जायते ।
गुणानां तुल्यता वेद्या वैपरित्ये द्विजर्षभ ।।

गुणप्रयोजनम् :-

गुणानामेवं सादृश्ये स्वामिसेवकयोस्तथा ।
कुमारीवरयोश्चापि सौहार्दमतिसुस्थिरम् ।।
नीचस्य निरपेक्षेण मध्यमस्यापि तेन चेत् ।
मध्यमेनोत्तमस्यापि सम्बन्धो मोददः स्मृतः ।।

तत्रापि पुनः विशेषः –

वरवध्वोर्वरः श्रेष्ठः स्वामी चापि स्वसेवकात् ।
गुणतस्तर्हि सौख्यं स्याद् वैपरीत्ये विपर्ययः ।।

तत्र वंशपरम्परायाः –

जन्मसमयस्य-वातावरणस्य च प्रभाव;
माता-पिता-जनुः कालः संसर्गश्चोत्तरोत्तरम् ।
गुणेषु प्रवलो हेतुरूत्तमादिषु जायते ।।
जन्मकालसमस्तस्माद् गुणः सञ्जायते जने ।
विविच्यैवं सदा विज्ञैर्विजेयं सदसत्फलम् ।।

पञ्चभूताधारेण व्यक्तित्वम् – बृहत्पाराशरहोराशास्त्रे ७६तमे अध्याये पञ्चभूतफलाध्याये पञ्चभूताधारेण व्यक्तित्वं एवं वर्णितमस्ति ।

पराशर उवाच अथ व्रवीमि ते पञ्चमहाभूतप्रभां द्विज ।
यज्जानतो ग्रहणां विद्यमाना ज्ञायते दशा ।।
भौमादयोऽग्निभूम्याकाशाम्बुबाताधिपाः स्मृताः ।
भलानुसारं खेटानां भूतानां फलमीरितम् ।।
भौमे बलिष्ठे तु शिखिप्रकृतिमानवो भवेत् ।
ज्ञे धरा प्रकृतिज्ञ्ज्ञेया दैवेज्ये खस्वभाववान् ।।
सिते वारिप्रकृतिको मन्दे वातस्वभाववान ।
मिश्रप्रकृतिको ज्ञेयो मिश्रखेटैर्द्विजोत्तमम् ।।
खावग्निप्रकृतिकश्चन्द्रेऽम्बुप्रकृतिर्भवेत् ।
खेटाः स्वभुक्तौ भूतोत्थां बोधयन्ति निजां प्रभाम् ।।
पञ्चभूतस्वभाववतां पुरूषाणां लक्षणानि
अग्निस्वभावो मनुजोबुभुक्षुर्वहुभुक् चलः ।।
शूरः कृशाङ्गो गौराङ्गो मनीषि मानवान् नरः ।।
भूमिस्वभावो मनुजो भोगढयोऽतिवलः सुखी ।
पद्मकर्पूरसुरभिः क्षान्तः पञ्चाननस्वनः ।।
नभः स्वभावो मनुजो नयविज्ज्ञानवानपि ।
असंवृतमुखो लम्बः शब्दार्थज्ञोऽतितीव्रधीः ।।
अम्बुस्वभावो मनुजः प्रभावान् मृदुलः सुधीः ।
भूपोऽनेकसुहृद् भारवाहकः प्रियभाषणः ।।
वातप्रकृतिकश्चण्डो दानी गौरतनुर्नृपः
क्षीणोऽटनप्रियश्चारिमर्दनो मनुजो भवेत् ।।

International Journal of Research in Social Sciences
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

पञ्चतत्वानां छाया

अग्निप्रभायां मनुजः स्वर्णाभः शुभदृष्टिमान् ।
सर्वार्थ सिद्धिमाञ्जेता वित्तलाभान्वितो भवेत् ।।
महीप्रभायां मनुजस्तनौ चारूसुगन्धवान् ।
सुस्निग्धदन्तनखरो धनधर्म-सुखान्वितः ।।
प्रभा नभोभवा शुभ्र वाचः प्रागल्भ्यदा स्मृता ।
सत्स्वनश्रुतिसंभूतं सौख्यं तस्यां भवेद ध्रुवम् ।।
अम्बुप्रभायां मनुजे मौढयं मलिनता गदाः ।
दीनताऽपि च तापश्च दृश्यन्ते सर्वदा बुधैः ।।

विविधयोगेषु वर्णितं व्यक्तित्वम् – श्रीकण्ठश्रीनाथविरञ्चियोगाः

रुद्राक्षाभरणो विभूतिधवलच्छायो महात्मा शिवं
ध्यायत्यात्मनिसन्ततं सुनियमः शैवव्रते दीक्षितः
साधुनामुपकारकः परमतेष्वनसूयो भवेत्
तेजस्वी शिवपूजया प्रमुदितः श्रीकण्ठयोगोद्भवः ।।
लक्ष्मीवान् सरसोक्तिचाटुनिपुणो नारायणाङ्कान्वितः
तन्नामाङ्कितक्षद्यपद्यमनिशं सङ्कीर्तयन् सज्जनैः ।
तद्भक्तापचितो प्रसन्नवगदनः सत्पुत्रदारन्वितः
सर्वेषां नयनप्रियोऽतिसुभगः श्रीनाथयोगोद्भवः ।।
ब्रह्मज्ञानपरायणो बहुमतिर्वेदप्रधानो गुणी
हृष्टो वैदिकमार्गतो न चलति प्रख्यातशिष्यप्रजः
सौम्योक्तिर्बहुवित्तदारतनयः सदब्रह्मतेजोज्वल
न्दीर्घायुर्विजितेन्द्रियो नतनृपोवैरञ्चियोगोद्भवः ।।

**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

सरस्वतीयोगः

धीमान्नाटकगद्यपद्यगणनालङ्कारशास्त्रेष्वयं
निष्णातः कविताप्रबन्धरचनाशास्त्रार्थपारङ्गतः ।
कीर्त्याकान्त जगत्रयोऽतिघनिको दारात्मजैरन्वितः
स्यात्सारस्वतयोगजो नृपवरैः संपूर्जितो भाग्यवान् ।।

अंशावतारयोगः

पुण्यश्लोकस्तीर्थचारी कालज्ञः कामासक्तः कालकर्त्ता जितात्मा।
वेदान्तज्ञो वेदशास्त्राधिकारी जातो राजश्रीधरोंऽशावतारे ।।

पञ्चमहापुरुषलक्षणानि

दीर्घास्यो बहुसाहसाप्तविभवः शूरोऽरिहन्तावली ।
गर्विष्ठो रूचके प्रथितगुणवान् सेनापितर्जित्वर ।
आयुष्मान् सकुशाग्रबुद्धिरमलो विद्वद्जन श्लोधितो
भूपो भद्रकयोगजोऽतिविभवश्चास्थानकोलाहलः ।।
हंसे सद्भिरभिष्टुतः क्षितिपतिः शङ्खाब्जमत्स्यङ्कुशै
श्चिहनैः पादकराङ्कितः शुभवपुर्मृष्टान्नभग्धार्मिकः ।
पुष्टाङ्गो धृतिमान्धनी सुतवधभाग्योन्वितो वर्धना
मालब्ये सुखभुक्सुवाहनयशा विद्वान्प्रसन्नेन्द्रियः ।।
शस्तः सर्वजनैः सुभूत्यबलवान् ग्रामधिपो वा नृपो
दुर्वृत्तः शशयोगजोऽन्यवनितावित्तान्वितः सौख्यवान् ।।
लग्नेन्दूरपि योगपञ्चकमिदं साम्रज्यसिद्धिप्रदं
तेष्वेकादिषु भाग्यवान् नृपसमो राजा नृपेन्द्रोऽधिकः ।।

विवेकानन्दस्वामिनां उदाहरणम्

**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

सायनराश्यनुगुणं विवेकानन्दस्वामिनां जातकचक्रे अंशावतारयोगः विरिञ्चिथोगश्च वर्त्तते । स्वामिनां व्यक्तित्वञ्च कथं प्रतिफलितमिति पश्यन्तु ।

अंशावतारयोगः

पुण्यश्लोकस्तीर्थचारी कालज्ञः कामासक्त कालकर्त्ता जितात्मा ।
वेदान्तज्ञो वेदशास्त्राधिकारी जातो राजश्रीधरोऽशावतारे ।।

उपर्युक्तयोगे वर्णिताः सर्वेऽपि गुणाः विवेकानन्दस्वामिने कथमनुगताः इति पश्यन्तु। ते पुण्यश्लोकाः, तीर्थचारिणः कालज्ञाः स आसन । काम + आसक्तः ृ कामासक्तः एवं विधा आसन। कालकर्त्तरः आसन्। जितात्मनः आसन। वेदान्तज्ञाः, वेदाशास्त्राधिकारिणः आसन्। परमहंस परिव्रजकाः आसन् ।

ब्रह्मज्ञानपरायणो बहुमतिर्वेदप्रधानो गुणी
इष्टो वैदिकमार्गतो न चलति प्रख्यात शिष्यप्रजः ।
सौम्योक्तिर्वहुवित्तदारतनयः सदब्रह्मतेजोज्ज्वल
दीर्घायुर्विजितेन्द्रयो नतनृपो वैरिञ्चियोगोद्भवः ।।

उपर्युक्तः योगः गृहस्थानां विषये संन्यासिनां च विषये संदर्भानुसारैः व्याख्येयः वर्त्तते। उदाहरणार्थं गृहस्थानां विषये 'प्रख्यातशिष्यप्रज्ञः' संगच्छते पूर्णतः । संन्यासिनां विषये तु 'प्रख्यातशिष्यः' इत्येतावन्मात्रं स्वीकर्त्तव्यं भवति । एवमेव 'बहुवित्तदारतनयः' इत्यत्र।

वैरिञ्चियोगोत्पन्नाः विवेकानन्दस्वामिनः योगे यथा वर्णितं तथा ब्रह्मज्ञानपरायणाः मेधाविनः वेदप्रधानाः, गुणिनः संतुष्टान्तरङ्गा वैदिकमार्गानतिक्रमिनः, प्रख्यातशिष्याः, सौम्योक्तिसंपन्नाः, सद्ब्रह्मतेजोज्ज्वलाः यशः कायाः विजितेन्द्रियाः नतनृपाश्च आसन्।

लग्नराश्यनुगुणं व्यक्तित्वम्

**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

वृत्तेक्षणो दुर्बलजानुरूग्रो भीरुर्जलेस्याल्लघुभुक् सुकामी।

शञ्चारशीलश्चवपलोऽनृतोऽक्तिर्व्रणाङ्किताङ्गः क्रियमे प्रजातः ।।

पृथुरुवक्त्रः कृषिकर्मकृत्स्यान्मध्यान्त्यसौख्यः प्रमदाप्रियश्च।

त्यागी क्षमी क्लेशसहश्च गोमान् पृष्टास्य पाश्र्लेऽङ्कयुतो वृषोत्थः ।।

श्यामेक्षणः कुञ्चितमूर्धजः स्त्रीक्रीडानुरक्तश्च परेङ्गितज्ञः ।

उत्तुङ्गनासः प्रियगीतनृत्तो वसन् सदान्तः सदने च युग्मे ।।

स्त्रीनिर्जितः पीनगलः समित्रो बह्वालयस्तुङ्गकटिर्घनाढ्यः ।

ह्रस्वश्च वक्रो द्दतगः कुलीरे मेद्यान्वितस्तोयरतोऽल्पपुत्रः ।।

पिङ्गेक्षणः स्थूलहनुर्विशालवक्त्रोऽभिमानी सपराक्रमः स्यात् ।

कुप्यत्यकार्ये वनशैलगामी मातुर्विधेयस्थिरधीर्मृगेन्द्रे ।।

स्त्रस्तांसवाहुः परवित्तगेहैः संपूज्यते सत्यरतः प्रियोक्तिः ।

क्रीडालसाक्षः सुरतप्रियः स्याच्छास्त्रार्थ विच्चाल्पसुतोऽङ्गनायाम ।।

चलतत्कृ शाङ्गोऽल्पसुतोऽतिभक्तो देवद्विजानामटनो द्विनामा ।

प्रांशुश्च दक्षः क्रयविक्रयेषु धीरोदयस्तौलिनि मध्यावादी ।।

वृत्तोरूज«ः पृथुनेत्रवक्षा रोगी शिशुत्वे गुरुतातहीनः ।

क्रुरक्रियो राजकुलाभिमुख्यः कीटेऽब्जरेखाङ्कितपाणिपादः ।।

दीर्घास्यकण्ठः पृथुकर्णनासः क्रर्मोद्यत कुब्जतनुर्नृपेष्टः।

प्राग्ल्भ्यः वाक् त्यागयुतोऽरिहन्ता सामैकसाध्योऽश्विभवबलाढ्यः ।।

अधः कृशः सत्त्वयुतो गृहीतवाक्योऽलसोऽगम्यजराङ्ग नेष्टः ।

धर्मध्वजो भाग्ययुतोऽटनश्च वातार्दितो नक्रभवो विलज्जः ।।

प्रच्छन्नपापो घटतुल्यदेहो विघातदक्षोऽध्वसहोऽल्पवित्तः ।

लुब्ध परार्थो क्षयवृद्धियुक्तो घटोद्भवः स्यात्प्रियगन्धपुष्पः ।।

अत्यम्बुपानः समचारुदेहः स्वदारगस्तोयजवित्तभोक्ता ।

विद्वान्कृतज्ञोऽभिभवत्यमित्रान् शुभेक्षणो भाग्ययुतोऽन्त्यराशौ ।।

संवेगा :- जातकचक्रे तृतीयस्थानं संवेगादिकं सूचयति। तत्र शौर्याधिपः (तृतीयस्थानाधिपः) इतर ग्रहसम्बन्धेन कीदृशान् संवेगान् , कीदृशं च फलं सूचयतीति 'जातकपारिजाते' सूचितमस्ति । तद्यथा –

शौर्याधिपे भानुयुतेऽत्र वीरश्चन्द्रान्विते मानसधैर्यजातः ।
दुष्टो जडो भौमयुते प्रकोपी सौम्यान्विते सात्त्विकबुद्धियुक्तः ।।
जीवान्विते धीरगुणाभिरामः समस्तशास्त्रार्थ विशारदः स्यात्।
कामातुरः शुक्रसमन्विते तु तन्मूलकोपात् कलहप्रवीणः ।।
जडो भवेद्वासरनाथसूनुयुक्तेऽति भीतो फणिसंयुते स्यान् ।
बहिर्गदो हृद्गदजाड्युक्तः केत्वन्विते मान्दियुते तथैव ।।

शौर्याधिपे भानुयुते – वीरः

शौर्याधिपे भौमयुते – दुष्टः, जडः, प्रकोपी

शौर्याधिपे गुर्वन्विते – धीरगुणाभिरामः

शौर्याधिपे शनिसमन्विते – जडः

शौर्याधिपे चन्द्रान्विते – मानसधैर्यजातः

शौर्याधिपे बुधन्विते – सात्त्विकबुद्धियुक्तः

शौर्याधिपे शुक्रसमून्विते – कामातुरः

शौर्याधिपे राह्वन्विते – अतिभीतः

शौर्याधिपे केत्वन्विते , मान्दियुते च – बहिर्गदः हृद्गदजाड्ययुक्तः इति संवेगाः सूचिताः वर्त्तन्ते ।

द्वितीय पतिना इतरग्रहसम्बन्धे विद्या परोक्षेण तत्र रूचिश्च जातकचक्रे द्वितीयस्थानं सहजविद्यास्थानमिति कीर्त्यमानमस्ति । चतुर्थस्थानात् पञ्चम लाभस्थानादपि विद्या सूचिता भवति। तथापि द्वितीयस्थानात् स्वाभाविकी विद्या

**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

स्वाभाविकी अभिरूचिश्च सूचिते भवतः इति पडितानामभिप्रायः। एतदेव 'फलदीपिकायां' सूचितमस्ति तद्यथा –

सम्बन्धे सवितुद्वितीयपतिना लोकोपकारक्षमां
विद्यामर्थमवाप्नुयादथ शनेः क्षुद्राल्पविद्यारतः ।।
जैवे बैदिकधर्मशास्त्रनिपुणो बौधेऽर्थशास्त्रे पटुः।
श्रुङ्गारोक्तिपटुर्भृगोर्हिमरूचेः किञ्चित्कलाविद्भवेत् ।।
कौजे क्रूरकलापटुश्च पिशुनो राहौ स्थिते लोहलः ।
केतौ भ्रश्यदलीकवाग्धनगतैः पापैश्च मूढोधनः ।।

द्वितीयपतिना रविसम्बन्धे – लोकोपकारकक्षमा विद्या
द्वितीयपतिना शनिसम्बन्धे - क्षुद्रो अथ च अल्पविद्या
द्वितीयपतिना गुरूसम्बन्धे – वैदिकधर्मशास्त्रनिपुणः
द्वितीयपतिना बुधसमन्विते – अर्थशास्त्रे पटुः
द्वितीयपतिना शुक्रसमन्विते – शृङ्गारोक्तिपटुः
द्वितीयपतिना चन्द्रसमन्विते – किञ्चित्कलावित्
द्वितीयपतिना कुजसमन्विते - क्रूरकलापटुः पिशुनश्च
द्वितीयपतिना राहुसमन्विते – लोहलः
द्वितीयपतिना केत्वन्विते – भ्रश्वदलीकवाक् इति सूचितमस्ति ।

बुद्धिः – जातकचक्रे पञ्चमस्थानं बुद्धिं सूचयति । अत एव अस्य बुद्धिस्थानमित्यपि नाम वर्त्तते । बुधः गुरूश्च धीकारकौ कीर्तितौ । एतावपि बुद्धिं सूचयतः । सर्वार्थचिन्तामणौ बुद्धिः एवं सूचिता ।।

बुद्धिस्थानाधिपे सौम्ये शुभदृष्टिसमन्विते ।

**International Journal of Research in Social Sciences**
Vol. 11 Issue 12, Dec 2021,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

शुभग्रहाणां क्षेत्रे वा बुद्धिमान्नीतिमान भवेत् ।।
परमोच्चांशके बुद्धिस्थाने नाथेन वीक्षिते ।
शुभग्रहाणां मध्यस्थे तीव्रबुद्धिं समादिशेत् ।।
कारके बलसंपूर्णे तदीशे शुभवीक्षिते ।
बुद्धिस्थानेऽथवा सौम्ये तीव्रबुद्धिं समादिशेत् ।।
बुद्धिस्थानाधिपस्यांशराशीशे शुभवीक्षिते।
वैशेषिकांशे वापि तीव्रबुद्धिं समादिशेत् ।।
कारकस्थितराश्यंशनाथे केन्द्रत्रिकोणगे ।
श्वरेण संदृष्टे तीव्रबुद्धिं समादिशेत् ।।

शुभग्रहाणां मध्यस्थे बुद्धिराशौ शुभान्विते ।
गुरौ केन्द्रत्रिकोणे वा बुद्धिमार्गविशारदः ।।
बुद्धिस्थानाधिपे सौम्ये बुद्धिराशिगते गुरौ ।
शुभग्रहाणां मध्यस्थे भावे बुद्धिं विनिर्दिशेत् ।।
बुद्धिस्थानेश्वरे केन्द्रे शुभग्रहसमन्विते ।
उच्चग्रहसमायुक्ते ग्रहणादिपटुर्भवेत् ।।
मृद्वंशादि समायुक्ते नाथकारकरवेचरे ।
शुभग्रहेण संदृष्टे धारणादिपटुर्भवेत् ।।
परेङ्गितज्ञो मेधावी कारकस्थितभागपे ।
केन्द्रत्रिकोणसंयुक्ते कारकग्रहवीक्षिते ।।

उपरिप्रदर्शितरीत्या ग्रह्योगः भवति चेत् कीदृशः बुद्धिमान् , तीव्रबुद्धिमान् धारणादिपटुश्च भवतीति महता विस्तरेण सूचितमस्ति ।

बुद्धिनाशः अपि सूचित –

पञ्चमे पापसंयुक्ते तदीशे पापसंयुते।
क्रूरषष्ठयंशके वापि बुद्धिनाशो भवेत्तदा ।।
पञ्चमे मन्दसंयुक्ते लग्नेशे मंदवीक्षिते ।
क्रूरषष्ठयंशसंयुक्ते बुद्धिनाशो भवेत्तदा ।।
पञ्चमे मन्दसंयुक्ते लग्नेशे मंदवीक्षिते ।
तदीशे पापसंयुक्ते बुद्धिजाड्यं समादिशेत् ।।

उपरि प्रदर्शितरीत्या जातके भवति चेत् बुद्धिनाशः अल्पबुद्धिर्वाभवतीति सूचितमस्ति।

स्मृतिः – विस्मृतिश्च –

जातके पञ्चमस्थानं स्मृतेः – विस्मृतेश्च सूचकं भवति । तद्यथा
मदंमान्द्यगुसंयुक्ते पञ्चमे शुभवर्जिते ।
तदीशे पापसंदृष्टे विस्मृतिः प्रायशो भवेत्
बुद्धिर्विस्मृतिपूर्वा स्यात्कारके शुभसंयुते ।
तदीशे पापसंयुक्ते क्रूरषष्ठयंशकेऽपि वा
एवं स्पष्टं यत् प्राचीन भारते अपि मनोवैज्ञानिकांशाः
केचित् ज्योतिश्शास्त्रदूंरा अपि सूचिताः आसन्निति ।